
Prajnaparamitas. Satasaha-
strika
Satasahastrika prajna-
paramita

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1092.



शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASĀHASRIKĀ-PRAJÑĀ-PĀRAMITĀ

A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED-THOUSAND STANZAS).

EDITED BY

PRATĀPACANDRA GHOṢA.

PART I. FAS. 8.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,

1904.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 15, PICCADILLY, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ... Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1–2	0	12
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–5 @ /6/	7	8
Aṇu Bhāṣyam, (Text) Fasc. 2–5 @ /6/ each	1	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 2–5; Vol. II. Fasc. 1–5 @ 1/ each	9	0
Bāla Bhaṭṭī, Vol. I, Fasc. 1	0	6
Baudhayana Srauta Sutra, Fasc. 1–2 @ /6/ each	0	12
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–4	1	8
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1–2	0	12
Catadusani, Fasc. 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/ each ...	8	0
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1–7; Vol. III, Fasc. 1–4 ...	4	2
Çatasahasrika-prajnaparamita (Text) Part I, Fasc. 1–7 @ /6/ each ...	2	10
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each; Vol IV, Fasc. 1	20	4
Çlokavartika, (English) Fasc. 1–4	3	0
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–17 @ /6/ each ...	5	4
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4; Vol. III, Fasc. 1–4 @ /6/ each; Vol 4, Fasc. 1	6	0
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each	1	2
Dan Kriya Kaumudi, Fasc. 1-2	0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-6...	2	4
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each	1	8
Kāla Viveka, Fasc. 1–6	2	4
Kātantra, (Text) Fasc. 1–6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each	10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each	3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each	2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1–11 @ /6/ each	7	8
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–8 @ /12 each	6	0
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each	4	14
Nyāyavārtika, (Text) Fasc. 1–6 @ /6/	2	4
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...	5	4
Nityacarapaddhati Fasc. 1–7 (Text) @ /6/	2	10
Nityacarapradiph Fasc. 1–4	1	8
Nyayabinduṭıkā, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6 Vol. II, Fasc. 1–8 @ /6/ each	3	6

अध्यात्मशून्यताविरहिता अध्यात्मशून्यतालक्षणेन । वहिर्द्धाशून्यताविरहिता वहिर्द्धाशून्यतालक्षणेन । अध्यात्मवहिर्द्धाशून्यताविरहिता अध्यात्मवहिर्द्धाशून्यतालक्षणेन। शून्यताशून्यताविरहिता शून्यताशून्यतालक्षणेन । महाशून्यताविरहिता महाशून्यतालक्षणेन। परमार्थशून्यताविरहिता परमार्थशून्यतालक्षणेन । संस्कृतशून्यताविरहिता संस्कृतशून्यतालक्षणेन। असंस्कृतशून्यताविरहिता असंस्कृतशून्यतालक्षणेन। अत्यन्तशून्यताविरहिता अत्यन्तशून्यतालक्षणेन । अनवराग्रशून्यताविरहिता अनवराग्रशून्यतालक्षणेन । अनवकारशून्यताविरहिता अनवकारशून्यतालक्षणेन । प्रकृतिशून्यताविरहिता प्रकृतिशून्यतालक्षणेन । सर्व्वधर्म्मशून्यताविरहिता सर्व्वधर्म्मशून्यतालक्षणेन । स्वलक्षणशून्यताविरहिता स्वलक्षणशून्यतास्वभावेन । अनुपलम्भशून्यताविरहिता अनुपलम्भशून्यतालक्षणेन । अभावशून्यताविरहिता अभावशून्यतालक्षणेन । स्वभावशून्यताविरहिता स्वभावशून्यतालक्षणेन । अभावस्वभावशून्यताविरहिता अभावस्वभावशून्यतालक्षणेन ।

स्मृत्युपस्थानानि विरहितानि स्मृत्युपस्थानलक्षणेन । सम्यक् प्रहाणानि विरहितानि सम्यक् प्रहाणलक्षणेन । ऋद्धिपादाविरहि[ता] ऋद्धिपादलक्षणेन। इन्द्रियाणि विरहितानि इन्द्रियलक्षणेन। ब[ला]नि विरहितानि बललक्षणेन । बोध्यङ्गानि विरहितानि बोध्यङ्गलक्षणेन । आर्य्याष्टाङ्गमार्गोविरहित आर्य्याष्टाङ्गमार्गलक्षणेन । आर्य्यसत्यानि विरहितान्यार्य्यसत्यलक्षणेन। ध्यानानि विरहितानि ध्यानलक्षणेन । अप्रमाणानि विरहितानि अप्रमाणलक्ष-

णेन। आरूप्य समापत्तयोविरहिता आरूप्य समापत्तिलक्षणेन। अष्टौ विमोक्षाविरहिता अष्टविमोक्षलक्षणेन। अनुपूर्व्वविहारसमापत्तयोविरहिता अनुपूर्व्वविहारसमापत्तिलक्षणेन। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि विरहितानि शून्यतानिमित्ताप्रणिहितविमोक्षमुखलक्षणेन। अभिज्ञाविरहिता अभिज्ञालक्षणेन। समाधयोविरहिताः समाधिलक्षणेन। धारणीमुखानि विरहितानि धारणीमुखलक्षणेन। तथागतबलानि विरहितानि तथागतबललक्षणेन। वैशारद्यानि विरहितानि वैशारद्यलक्षणेन। प्रतिसम्बिदोविरहिताः प्रतिसम्बिदलक्षणेन। महामैत्रीविरहिता महामैत्रीलक्षणेन। महाकरुणाविरहिता महाकरुणालक्षणेन। आवेणिकबुद्धधर्म्माविरहिता आवेणिकबुद्धधर्म्मस्वभावेन। स्रोत आपत्तिफलं विरहितं स्रोत आपत्तिफललक्षणेन। सकृदागामिफलं विरहितं सकृदागामिफललक्षणेन। अनागामिफलं विरहितमनागामिलक्षणेन। अर्हत्त्वविरहितमर्हत्त्वलक्षणेन। प्रत्येकबोधिर्व्विरहिता प्रत्येकबोधिलक्षणेन। मार्गाकारज्ञताविरहिता मार्गाकारज्ञतालक्षणेन। सर्व्वाकारज्ञताविरहिता सर्व्वाकारज्ञतालक्षणेन। तथताविरहिता तथतालक्षणेन। अवितथताविरहिता अवितथतालक्षणेन। अनन्यतथताविरहिता अनन्यतथतालक्षणेन। धर्म्मताविरहिता धर्म्मतालक्षणेन। धर्म्मधातुर्व्विरहितो धर्म्मधातुलक्षणेन। धर्म्मस्थितिताविरहिता धर्म्मस्थितितालक्षणेन। धर्म्मनियामताविरहिता धर्म्मनियामतालक्षणेन। भूतकोटिर्व्विरहिता भूतकोटिलक्षणेन। लक्षणस्वभावेनापि लक्षणं विरहितं। स्वभावलक्षणेनापि लक्षणस्वभावोविरहितः।

आह । य आयुष्मन् सुभूते बोधिसत्त्वोमहासत्त्वोऽत्र शिक्षायां शिक्षिष्यते । सनिर्यास्यति सर्व्वाकारज्ञतायां । सुभूतिराह । एवमेवैतदायुष्मञ्छारद्वतीपुत्र एव मेतत् । यो बोधिसत्त्वोमहासत्त्वोऽत्र शिक्षायां शिक्षिष्यते । सनिर्यास्यति सर्व्वाकारज्ञतायां । तत्कस्य हेतोस्तथाह्यायुष्मञ्छारद्वतीपुत्राजातानिर्याताः सर्व्वधर्म्माः । आह । कतम आयुष्मन् सुभूतेऽजातानिर्याताः सर्व्वधर्म्माः । सुभूतिराह । रूपमायुष्मञ्छारद्वतीपुत्र शून्यरूपेण । तस्य नैव जातिरुपलभ्यते । न निर्याणं । वेदनाशून्यावेदनया तस्य नैव जातिरुपलभ्यते न निर्याणं । संज्ञाशून्यासंज्ञया । तस्यानैव जातिरुपलभ्यते । न निर्याणं । संस्काराः शून्याः । संस्कारैस्तेषां नैवजातिरुपलभ्यते न निर्याणं । विज्ञानं शून्यं विज्ञानेन तस्य नैव जातिरुपलभ्यते न निर्याणं । चक्षुरायुष्मञ्छारद्वतीपुत्र शून्यं चक्षुषा तस्य नैव जातिरुपलभ्यते न निर्याणं । श्रोत्रं शून्यं श्रोत्रेण तस्य नैव जातिरुपलभ्यते न निर्याणं । घ्राणं शून्यं घ्राणेन तस्य नैवजातिरुपलभ्यते न निर्याणं । जिह्वाशून्या जिह्वया तस्या नैवजातिरुपलभ्यते न निर्याणं । कायः शून्यः कायेन तस्य नैव जातिरुपलभ्यते न निर्याणं । मनः शून्यं मनसा तस्य नैव जातिरुपलभ्यते न निर्याणं । रूपमायुष्मञ्छारद्वतीपुत्र शून्यं रूपेण तस्य नैव जातिरुपलभ्यते न निर्याणं । शब्दः शून्यः शब्देन तस्य नैव जातिरुपलभ्यते न निर्याणं । गन्धः शून्योगन्धेन तस्य नैव जातिरुपलभ्यते न निर्याणं । रसः शून्योरसेन तस्य नैव जातिरुपलभ्यते न निर्याणं । स्पर्शः शून्यः स्पर्शेन तस्य नैव जातिरुपलभ्यते न निर्याणं । धर्म्माः शून्याधर्म्मैस्तेषां नैव जातिरुपलभ्यते न निर्याणं ।

चक्षुर्विज्ञानमायुष्मञ्छारद्वतीपुत्र शून्यं चक्षुर्विज्ञानेन तस्य नैव जातिरुपलभ्यते न निर्याणं। श्रोत्रविज्ञानं शून्यं श्रोत्रविज्ञानेन तस्य नैव जातिरुपलभ्यते न निर्याणं। घ्राणविज्ञानं शून्यं घ्राणविज्ञानेन तस्य नैव जातिरुपलभ्यते न निर्याणं। जिह्वाविज्ञानं शून्यं जिह्वाविज्ञानेन तस्य नैव जातिरुपलभ्यते न निर्याणं। कायविज्ञानं शून्यं कायविज्ञानेन तस्य नैव जातिरुपलभ्यते न निर्याणं। मनोविज्ञानं शून्यं मनोविज्ञानेन तस्य नैव जातिरुपलभ्यते न निर्याणं।

चक्षुःसंस्पर्श आयुष्मञ्छारद्वतीपुत्र शून्यश्चक्षुःसंस्पर्शेन तस्य नैव जातिरुपलभ्यते न निर्याणं। श्रोत्रसंस्पर्शः शून्यः श्रोत्रसंस्पर्शेन तस्य नैव जातिरुपलभ्यते न निर्याणं। घ्राणसंस्पर्शः शून्यो घ्राणसंस्पर्शेन तस्य नैव जातिरुपलभ्यते न निर्याणं। जिह्वासंस्पर्शः शून्यो जिह्वासंस्पर्शेन तस्य नैवजातिरुपलभ्यते न निर्याणं। कायसंस्पर्शः शून्यः कायसंस्पर्शेन तस्य नैव जातिरुपलभ्यते न निर्याणं। मनः संस्पर्शः शून्यो मनः संस्पर्शेन तस्य नैवजातिरुपलभ्यते न निर्याणं।

चक्षुःसंस्पर्शप्रत्ययवेदनाशून्या चक्षुःसंस्पर्शप्रत्ययवेदनया तस्या नैव जातिरुपलभ्यते न निर्याणं। श्रोत्रसंस्पर्शप्रत्ययवेदना शून्या श्रोत्रसंस्पर्शप्रत्ययवेदनया तस्या नैव जातिरुपलभ्यते न निर्याणं। घ्राणसंस्पर्शप्रत्ययवेदना शून्या घ्राणसंस्पर्शप्रत्ययवेदनया तस्या नैव जातिरुपलभ्यते न निर्याणं। जिह्वासंस्पर्शप्रत्ययवेदना शून्या जिह्वासंस्पर्शप्रत्ययवेदनया तस्यानैव जातिरुपलभ्यते न निर्याणं। कायसंस्पर्शप्रत्ययवेदना शून्या कायसंस्पर्शप्रत्ययवेदनया तस्यानैव जातिरुपलभ्यते न निर्याणं। मनःसंस्पर्शप्रत्ययवेदना शून्या मनःसंस्पर्शप्रत्ययवेदनया तस्यानैव जातिरुपलभ्यते न निर्याणं।

पृथिवीधातुरायुष्मञ्छारद्वतीपुत्र शून्यः पृथिवीधातुना तस्य नैवजातिरुपलभ्यते न निर्याणं। अब्धातुः शून्योऽब्धातुना तस्य नैवजातिरुपलभ्यते न निर्याणं। तेजोधातुः शून्यस्तेजोधातुना तस्य नैवजातिरुपलभ्यते न निर्याणं। वायुधातुः शून्यो वायुधातुना तस्य नैवजातिरुपलभ्यते न निर्याणं। आकाशधातुः शून्य आकाश-धातुना तस्य नैवजातिरुपलभ्यते न निर्याणं। विज्ञानधातुः शून्यो विज्ञानधातुना। तस्य नैवजातिरुपलभ्यते न निर्याणं।

अविद्या आयुष्मञ्छारद्वतीपुत्र शून्याऽविद्यया तस्यानैवजाति-रुपलभ्यते न निर्याणं। संस्काराः शून्याः संस्कारैः तेषां नैवजा-तिरुपलभ्यते न निर्याणं। विज्ञानं शून्यं विज्ञानेन तस्य नैवजाति-रुपलभ्यते न निर्याणं। नामरूपं शून्यं नामरूपेण तस्य नैवजाति-रुपलभ्यते न निर्याणं। षड़ायतनं शून्यं षड़ायतनेन तस्य नैव-जातिरुपलभ्यते न निर्याणं। स्पर्शः शून्यः स्पर्शेन तस्य नैवजाति-रुपलभ्यते न निर्याणं। वेदनाशून्यावेदनया तस्यानैवजातिरुपल-भ्यते न निर्याणं। तृष्णाशून्यातृष्णया तस्यानैवजातिरुपलभ्यते न निर्याणं। उपादानं शून्यमुपादानेन तस्य नैवजातिरुपलभ्यते न निर्याणं। भवः शून्योभवेन तस्य नैवजातिरुपलभ्यते न निर्याणं। जातिः शून्यो जात्या तस्यानैवजातिरुपलभ्यते न निर्याणं। जरा-मरणं शून्यं जरामरणेन तस्य नैवजातिरुपलभ्यते न निर्याणं।

दानपारमितायुष्मञ्छारद्वतीपुत्र शून्यादानपारमितया तस्या नैवजातिरुपलभ्यते न निर्याणं। शीलपारमिता शून्या शीलपार-

मितया तस्यानैवजातिरुपलभ्यते न निर्याणं। क्षान्तिपारमिता शून्या क्षान्तिपारमितया तस्यानैवजातिरुपलभ्यते न निर्याणं। वीर्य्यपारमिता शून्या वीर्य्यपारमितया तस्यानैवजातिरुपलभ्यते न निर्याणं। ध्यानपारमिता शून्या ध्यानपारमितया तस्यानैवजातिरुपलभ्यते न निर्याणं। प्रज्ञापारमिता शून्या प्रज्ञापारमितया तस्यानैवजातिरुपलभ्यते न निर्याणं।

अध्यात्मशून्यतायुष्मञ्छारद्वतीपुत्र शून्याऽध्यात्मशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। वहिर्द्धाशून्यताशून्या वहिर्द्धाशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। अध्यात्मवहिर्द्धाशून्यताशून्याऽध्यात्मवहिर्द्धाशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। शून्यताशून्यता शून्या शून्यताशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। महाशून्यताशून्या महाशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। परमार्थशून्यताशून्या परमार्थशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। संस्कृतशून्यताशून्या संस्कृतशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। असंस्कृतशून्यताशून्या असंस्कृतशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। अत्यन्तशून्यताशून्या अत्यन्तशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। अनवराग्रशून्यताशून्या अनवराग्रशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। अनवकारशून्यताशून्याऽनवकारशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। प्रकृतिशून्यताशून्या प्रकृतिशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। सर्व्वधर्म्मशून्यता शून्या सर्व्वधर्म्मशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं।

स्वलक्षणशून्यताशून्या स्वलक्षणशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। अनुपलम्भशून्यताशून्या अनुपलम्भशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। अभावशून्यताशून्या अभावशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं। स्वभावशून्यताशून्या स्वभावशून्यतया। तस्यानैवजातिरुपलभ्यते न निर्याणं। अभावस्वभावशून्यताशून्याऽभावस्वभावशून्यतया तस्यानैवजातिरुपलभ्यते न निर्याणं।

स्मृत्युपस्थानान्यायुष्मञ्छारद्वतीपुत्र शून्यानि स्मृत्युपस्थानैः तेषां नैवजातिरुपलभ्यते न निर्याणं। सम्यक्प्रहाणानि शून्यानि सम्यक् प्रहाणैः तेषां नैवजातिरुपलभ्यते न निर्याणं। ऋद्धिपादाः शून्याः ऋद्धिपादैः तेषां नैवजातिरुपलभ्यते न निर्याणं। इन्द्रियाणि शून्यानीन्द्रियैः तेषां नैवजातिरुपलभ्यते न निर्याणं। बलानि शून्यानि बलैः तेषां नैवजातिरुपलभ्यते न निर्याणं। बोध्यङ्गानि शून्यानि बोध्यङ्गैः तेषां नैवजातिरुपलभ्यते न निर्याणं। आर्य्याष्टाङ्गमार्गः शून्य आर्य्याष्टाङ्गमार्गेण तस्य नैवजातिरुपलभ्यते न निर्याणं।

आर्य्यसत्यान्यायुष्मञ्छारद्वतीपुत्र शून्यान्यार्य्यसत्यैः तेषां नैवजातिरुपलभ्यते न निर्याणं। ध्यानानि शून्यानि ध्यानैः तेषां नैवजातिरुपलभ्यते न निर्याणं। अप्रमाणानि शून्यान्यप्रमाणैः तेषां नैवजातिरुपलभ्यते न निर्याणं। आरूप्यसमापत्तयः शून्या आरूप्यसमापत्तिभिः तेषां नैवजातिरुपलभ्यते न निर्याणं। अष्टौ विमोक्षाः शून्याविमोक्षैः तेषां नैवजातिरुपलभ्यते न

निर्याणं । नवाऽनुपूर्व्वविहारसमापत्तयः शून्या नवाऽनुपूर्व्वविहारसमापत्तिभिः तासां नैवजातिरुपलभ्यते न निर्याणं । शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि शून्यानि शून्यतानिमित्ताप्रणिहितविमोक्षैः तेषां नैवजातिरुपलभ्यते न निर्याणं । अभिज्ञाः शून्या अभिज्ञाभिः तासां नैवजातिरुपलभ्यते न निर्याणं । समाधयः शून्याः समाधिभिः तेषां नैवजातिरुपलभ्यते न निर्याणं । धारणीमुखानि शून्यानि धारणीमुखैः तेषां नैवजातिरुपलभ्यते न निर्याणं । दशतथागतबलानि शून्यानि दशतथागतबलैः तेषां नैवजातिरुपलभ्यते न निर्याणं । चत्वारि वैशारद्यानि शून्यानि वैशारद्यैः तेषां नैवजातिरुपलभ्यते न निर्याणं । चतस्रः प्रतिसम्विदः शून्याः प्रतिसम्विद्भिः तासां नैवजातिरुपलभ्यते न निर्याणं । महामैत्रीशून्या महामैत्र्या तस्यानैवजातिरुपलभ्यते न निर्याणं । महाकरुणाशून्या महाकरुणया तस्यानैवजातिरुपलभ्यते न निर्याणं । अष्टादशावेणिकाबुद्धधर्म्माः शून्या आवेणिक बुद्धधर्म्मैः तेषां नैवजातिरुपलभ्यते न निर्याणं ।

स्रोत आपत्तिफलमायुष्मञ्छारद्वतीपुत्र शून्यं स्रोत आपत्तिफलेन तस्य नैवजातिरुपलभ्यते न निर्याणं । सकृदागामिफलं शून्यं सकृदामिफलेन तस्य नैवजातिरुपलभ्यते न निर्याणं । अनागामिफलं शून्यमनागामिफलेन तस्य नैवजातिरुपलभ्यते न निर्याणं । अर्हत्त्वं शून्यमर्हत्त्वेन तस्य नैवजातिरुपलभ्यते न निर्याणं । प्रत्येकबोधिः शून्या प्रत्येकबोध्या । तस्यानैवजातिरुपलभ्यते न निर्याणं ।

तथता युष्मञ्छारद्वतीपुत्र शून्या तथतया। तस्यानैवजातिरुपलभ्यते न निर्याणं। अवितथताशून्याऽवितथतया। तस्यानैवजातिरुपलभ्यते न निर्याणं। अनन्यतथतायुष्मञ्छारद्वतीपुत्र शून्याऽनन्यतथतया तस्यानैवजातिरुपलभ्यते न निर्याणं। धर्म्मताशून्या धर्म्मतया तस्यानैवजातिरुपलभ्यते न निर्याणं। धर्म्मधातुः शून्यो धर्म्मधातुना तस्य नैवजातिरुपलभ्यते न निर्याणं। धर्म्मस्थितिताशून्या धर्म्मस्थितितया तस्यानैवजातिरुपलभ्यते न निर्याणं। धर्म्मनियामताशून्या धर्म्मनियामतया तस्यानैवजातिरुपलभ्यते न निर्याणं। भूतकोटिः शून्या भूतकोट्या तस्यानैवजातिरुपलभ्यते न निर्याणं।

एवमायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वाकारज्ञताया अभ्यासीभवति। स यथा यथा सर्व्वाकारज्ञताया अभ्यासी भवति स तथा तथा कायपरिशुद्धिं वाक्परिशुद्धिं चित्तपरिशुद्धिं लक्षणपरिशुद्धिञ्चाधिगच्छति। यथा यथा कायपरिशुद्धिं वाक्परिशुद्धिं चित्तपरिशुद्धिञ्चाधिगच्छति। स तथा-तथा बोधिसत्त्वोमहासत्त्वो रागसहगतं चित्तं नोत्पादयति। द्वेष सहगतं मोहसहगतं मानसहगतं मायाशाठ्यसहगतं ईर्ष्यामात्सर्य्यसहगतं लोभसहगतं दृष्टिसहगतं चित्तं नोत्पादयति। स रागचित्तमुत्पाद्य द्वेषमोहमायाशाठ्येर्षा मात्सर्य्यलोभसहगतं चित्तमुत्पादयन् न(?) जातुमातुः कुक्षावुपगद्यते। सततसमितमुपपादुको भवति। न च कदाचिदपायेषूपपद्यते। अन्यत्र सत्त्वपरिपाकहेतोः सर्व्वबुद्धक्षेत्रेण बुद्धक्षेत्रं संक्रामति। सत्त्वान् परिपाचयन् न जातुबुद्धैर्भगवद्भिर्व्विरहितो भवति। यावदनुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धः।

तस्मात्तर्ह्यायुष्मन् शारद्वतीपुत्र बोधिसत्त्वेन महासत्त्वेनेमां गुणानुशंसां प्रतिलब्धुकामेनैवं प्रज्ञापारमितायामनिक्षिप्तधुरेण चरितव्यं। एवं ह्यायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सभासीभवति सर्व्वाकारज्ञतायां ॥ ० ॥

शतसाहस्रयाः प्रज्ञापारमितायाश्चतुर्थः परिवर्त्तः।

अथ पञ्चमः परिवर्त्तः।

अथायुष्मान् सुभूतिर्भगवन्तमेतदवोचत्। सचेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपायकौशलेन प्रज्ञापारमितायां चरन् रूपे चरति निमित्ते चरति। स चेद् वेदनायां चरति निमित्ते चरति। स चेत् संज्ञायां चरति निमित्ते चरति। स चेत् संस्कारेषु चरति निमित्ते चरति। स चेद्विज्ञाने चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपायकौशलेन प्रज्ञापारमितायां चरन् रूपं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपायकौशलेन प्रज्ञापारमितायां चरन् रूपमनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहा-

सत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपमशान्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपं विविक्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपमविविक्तमिति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् वेदनानित्येति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् वेदनाऽनित्येति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् वेदनासुखेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् वेदनां दुःखेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् वेदनां शान्तेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् वेदनामशान्तेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वो महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् वेदनां विविक्तेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् वेदनामविविक्तेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संज्ञानित्येति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन

प्रज्ञापारमितायां चरन् संज्ञा अनित्येति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संज्ञासुखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संज्ञादुःखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संज्ञा आत्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संज्ञा अनात्मिकेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संज्ञाशान्तेति चरति निमित्ते चरति स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संज्ञाऽशान्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संज्ञाविविक्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संज्ञाऽविविक्तेति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संस्कारानित्या इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संस्कारा अनित्या इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संस्कारा सुखा इति चरति निमित्ते चरति। स चेद्भगवन् बोधि-

सत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संस्कारा-दुःखा इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहा-सत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संस्कारा आत्मान इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वो-ऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संस्काराः अनात्मान इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संस्काराः शान्ता इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संस्काराः अशान्ता इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञा-पारमितायां चरन् संस्काराविविक्ता इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् संस्कारा अविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापार-मितायां चरन् विज्ञानं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विज्ञानमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विज्ञानं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधि-सत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विज्ञानं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहा-सत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विज्ञानमात्मेति

चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विज्ञानमनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विज्ञानं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विज्ञानमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विज्ञानं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विज्ञानमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुरनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुः सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुरात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुरनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां

चरन् चक्षुः शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुरशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुरविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वो ऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रमनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रमशान्तमिति चरति निमित्ते चरति। स

चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणमनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापापमितायां चरन् घ्राणमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वानित्येति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाऽनित्येति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वासुखमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वादुःखमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वा आत्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाऽनात्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाशान्तेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाऽशान्तेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविविक्तेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाऽविविक्तेति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायोनित्यमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां

चरन् कायोऽनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायः सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायो-दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो-महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् काय आत्मेति चरति निमित्ते चरति। न चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनु-पाय कौशलेन प्रज्ञापारमितायां चरन् कायोऽनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायः शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायोऽशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौ-शलेन प्रज्ञापारमितायां चरन् कायोविविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायोऽविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापार-मितायां चरन् मनोनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोऽनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्

मनःसुखमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वो-महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोदुःख-मिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहा-सत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मन आत्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनु-पाय कौशलेन प्रज्ञापारमितायां चरन् मनोऽनात्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनःशान्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोऽशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमि-तायां चरन् मनोविविक्तमिति चरति निमित्ते चरति । स चेद्-भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोऽविविक्तमिति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापा-रमितायां चरन् रूपं नित्यमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपमनित्यमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपं सुखमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वो-महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपं दुःख-मिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहास-

त्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपमनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रूपमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्दोनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिमत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्दोऽनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्दःसुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्दोदुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्द आत्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्दोऽनात्मेति चरति

निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्दः शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्दोऽशान्त इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्दोविविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शब्दोऽविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां* चरन् गन्धोनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् गन्धोऽनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् गन्धः सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् गन्धोदुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् गन्ध आत्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् गन्धोऽनात्मेति चरति

---

* आदर्शपुस्तके गन्धादिशब्दानां केषाञ्चित् द्वितीयान्तत्वं केषाञ्चित् प्रथमान्तत्वं दृश्यते।

निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् गन्धः शान्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् गन्धोऽशान्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् गन्धोविविक्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् गन्धोऽविविक्तमिति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रसोनित्यमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रसोऽनित्यमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रसःसुखमिति चरति निमित्ते चरिति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रसोदुःखमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रस आत्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रसोऽनात्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रसःशान्तमिति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रसोऽशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रसोविविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् रसोऽविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्पर्शोनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्पर्शोऽनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्पर्शःसुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्पर्शोदुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्पर्श आत्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्पर्शोऽनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्पर्शःशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्पर्शोऽशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां

चरन् स्पर्शोविविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्पर्शोऽविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्मानित्या इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्मा अनित्या इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्माःसुखा इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्मादुःखा इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्मा आत्मान इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्मा अनात्मान इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्माः शान्ता इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्मा अशान्ता इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्माविविक्ता इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धर्म्मा अविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञानं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञानमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञानं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञानं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञानमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञान मनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञानं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञानमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञानं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुर्व्विज्ञानमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानं नित्यमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानमनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानं विविक्तमिति चरति निमित्ते चरति। स स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रविज्ञानमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणविज्ञानं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणविज्ञानमनित्यमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणविज्ञानं सुखमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणविज्ञानं दुःखमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञपारमितायां चरन् घ्राणविज्ञानमात्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणविज्ञानमनात्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणविज्ञानं शान्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणविज्ञानमशान्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणविज्ञानं विविक्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणविज्ञानमविविक्तमिति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविज्ञानं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविज्ञानमनित्यमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविज्ञानं सुखमिति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविज्ञानं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविज्ञानमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविज्ञानं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविज्ञानमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविज्ञानं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् जिह्वाविज्ञानमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानमात्मेति चरति निमित्ते चरति। स चेद्भग-

वन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानमनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् कायविज्ञानमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानमनात्मेति चरति निमित्ते चरति। स चेद्भगवन्

बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञान मात्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानं शान्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानमशान्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानं विविक्तमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् मनोविज्ञानमविविक्तमिति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शं नित्यमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शमनित्यमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शं सुखमिति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शमात्मेति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शमनात्मेति चरति निमित्ते चरति । स चेद्भगवन्

बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् चक्षुसंस्पर्शमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शमनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन्

बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शमविविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शं नित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शमनित्यमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शं सुखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शं दुःखमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शमात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शमनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शं शान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शमशान्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो-

महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शं विविक्तमिति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो-महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् घ्राणसंस्पर्शम-विविक्तमिति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननवकारशून्यता नित्येति चाऽनित्येति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननवकारशून्यता सुखेति च दुःखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननवकारशून्यता आत्मिकेति चाऽनात्मिकेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननवकारशून्यता शान्तेति चाऽशान्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननवकारशून्यता विविक्तेति चाऽविविक्तेति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् प्रकृतिशून्यता नित्येति चाऽनित्येति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् प्रकृतिशून्यता सुखेति च दुःखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् प्रकृतिशून्यता आत्मिकेति चाऽनात्मिकेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् प्रकृतिशून्यता शान्तेति चाऽशान्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् प्रकृतिशून्यता विविक्तेति चाऽविविक्तेति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सर्व्वधर्म्मशून्यता नित्येति चाऽनित्येति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सर्व्वधर्म्मशून्यता सुखेति च दुःखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सर्व्वधर्म्मशून्यता आत्मिकेति चाऽनात्मिकेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सर्व्वधर्म्मशून्यता शान्तेति चाऽशान्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सर्व्वधर्म्मशून्यता विविक्तेति चाऽविविक्तेति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वलक्षणशून्यता नित्येति चाऽनित्येति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वलक्षणशून्यता सुखेति च दुःखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वलक्षणशून्यता आत्मिकेति चाऽनात्मिकेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वलक्षणशून्यता शान्तेति चाऽशान्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वलक्षणशून्यता विविक्तेति चाऽविविक्तेति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननुपलम्भशून्यता नित्येति चाऽनित्येति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननुपलम्भशून्यता सुखेति च दुःखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननुपलम्भशून्यता आत्मिकेति चाऽनात्मिकेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननुपलम्भशून्यता शान्तेति चाऽशान्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्ननुपलम्भशून्यता विविक्तेति चाऽविविक्तेति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावशून्यता नित्येति चाऽनित्येति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावशून्यता सुखेति च दुःखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावशून्यता आत्मिकेति चाऽनात्मिकेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावशून्यता शान्तेति चाऽशान्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावशून्यता विविक्तेति चाऽविविक्तेति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वभावशून्यता नित्येति चाऽनित्येति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वभावशून्यता सुखेति च दुःखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वभावशून्यता आत्मिकेति चाऽनात्मिकेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वभावशून्यता शान्तेति चाऽशान्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्वभावशून्यता विविक्तेति चाऽविविक्तेति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावस्वभावशून्यता नित्येति चाऽनित्येति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावस्वभावशून्यता सुखेति च दुःखेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावस्वभावशून्यता आत्मिकेति चाऽनात्मिकेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावस्वभावशून्यता शान्तेति चाऽशान्तेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभावस्वभावशून्यता विविक्तेति चाऽविविक्तेति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्मृत्युपस्थानानि नित्यानीति चाऽनित्यानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्मृत्युपस्थानानि सुखानीति च दुःखानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्मृत्युपस्थानानि आत्मिकानीति चाऽनात्मिकानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् स्मृत्युपस्थानानि शान्तानीति चाऽशान्तानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां

चरन् स्मृत्युपस्थानानि विविक्तानीति चाऽविविक्तानीति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सम्यक्प्रहाणानि नित्यानीति चाऽनित्यानीति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सम्यक्प्रहाणानि सुखानीति च दुःखानीति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सम्यक्प्रहाणानि आत्मिकानीति चाऽनात्मिकानीति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सम्यक्प्रहाणानि शान्तानीति चाऽशान्तानीति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् सम्यक्प्रहाणानि विविक्तानीति चाऽविविक्तानीति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहसत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नृद्धिपादाः नित्या इति चाऽनित्या इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नृद्धिपादाः सुखा इति च दुःखा इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नृद्धिपादाः आत्मान इति चाऽनात्मान इति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नृद्धिपादाः शान्ता इति चाऽशान्ता

इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वो-ऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नृद्धिपादाः विविक्ता इति चाऽविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्निन्द्रियाणि नित्यानीति चाऽनित्यानीति चरति निमित्ते चरति। स चेद्भगवन बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्निन्द्रियाणि सुखानीति च दुःखानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्निन्द्रियाणि आत्मिकानीति चाऽनात्मिकानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वो-ऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्निन्द्रियाणि शान्तानीति चाऽशान्तानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो-महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्निन्द्रियाणि विविक्तानीति चाऽविविक्तानीति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बलानि नित्यानीति चाऽनित्यानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बलानि सुखानीति च दुःखानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बलानि आत्मिकानीति चाऽनात्मिकानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बलानि शान्तानीति चाऽशान्ता-

नीति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बलानि विविक्तानीति चाऽविविक्तानीति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बोध्यङ्गानि नित्यानीति चाऽनित्यानीति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बोध्यङ्गानि सुखानीति च दुःखानीति चरति निमित्ते चरति । स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बोध्यङ्गानि आत्मिकानीति चाऽनात्मिकानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बोध्यङ्गानि शान्तानीति चाऽशान्तानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् बोध्यङ्गानि विविक्तानीति चाऽविविक्तानीति चरति निमित्ते चरति ।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्याष्टाङ्गमार्गो नित्य इति चाऽनित्य इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्याष्टाङ्गमार्गः सुख इति च दुःख इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्याष्टाङ्गमार्ग आत्मेति चाऽनात्मेति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्याष्टाङ्गमार्गः शान्त इति

चाऽशान्त इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो-महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्याष्टाङ्गमार्गो विविक्त इति चाऽविविक्त इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्यसत्यानि नित्यानीति चाऽनित्यानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्यसत्यानि सुखानीति च दुःखानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्यसत्यानि आत्मिकानीति चाऽनात्मिकानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो-महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्यसत्यानि शान्तानीति चाऽशान्तानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नार्य्य-सत्यानि विविक्तानीति चाऽविविक्तानीति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् ध्यानानि नित्यानीति चाऽनित्यानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् ध्यानानि सुखानीति च दुःखानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वो-महासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् ध्यानानि आत्मिकानीति चाऽनात्मिकानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां

चरन् ध्यानानि शान्तानीति चाऽशान्तानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् ध्यानानि विविक्तानीति चाऽविविक्तानीति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नप्रमाणानि नित्यानीति चाऽनित्यानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नप्रमाणानि सुखानीति च दुःखानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नप्रमाणानि आत्मिकानीति चाऽनात्मिकानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नप्रमाणानि शान्तानीति चाऽशान्तानीति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नप्रमाणानि विविक्तानीति चाऽविविक्तानीति चरति निमित्ते चरति।

*स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नारूप्यसमापत्तीर्नित्या इति चाऽनित्या इति चरति सुखाइति दुःखा इति आत्मिका इति अनात्मिका इति शान्ता

---

* अत्रापि पूर्व्ववत् नित्यानित्यादि प्रत्येक विशेषणस्थले स चेद्भगवन्नित्यादि वाक्यभागोलिखितुमुचितः। आदर्शपुस्तके तथा लिखनाभावात् मया यथा दृष्टमेव लिखितमिति।

इति अशान्ता इति विविक्ता इति चाऽविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् विमोचा नित्या इति चानित्या इति सुखा इति दुःखा इति आत्मान इति चाऽनात्मान इति शान्ता इति चाऽशान्ता इति विविक्ता इति चाऽविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् नवानुपूर्व्वविहारसमापत्तीर्नित्या इति चाऽनित्या इति सुखा इति दुःखा इति आत्मिका इति चाऽनात्मिका इति शान्ता इति चाऽशान्ता इति विविक्ता इति चाऽविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् शून्यतानिमित्ताप्रणिहितविमोचमुखानि नित्यानीति चाऽनित्यानीति सुखानीति च दुःखानीति आत्मिकानीति चाऽनात्मिकानीति शान्तानीति चाऽशान्तानीति विविक्तानीति चाऽविविक्तानीति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नभिज्ञा नित्या इति चानित्या इति सुखा इति दुःखा इति आत्मान इति चाऽनात्मान इति शान्ता इति चाऽशान्ता इति विविक्ता इति चाऽविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् समाधीर्नित्या इति चाऽनित्या इति सुखा इति दुःखा

इति आत्मिका इति अनात्मिका इति शान्ता इति चाऽशान्ता इति विविक्ता इति चाऽविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् धारणीमुखानि नित्यानीति अनित्यानीति सुखानीति दुःखानीति आत्मिकानीति अनात्मिकानीति शान्तानीति अशान्तानीति विविक्तानीति अविविक्तानीति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् दशतथागतबलानि नित्यानीति अनित्यानीति सुखानीति दुःखानीति आत्मिकानीति अनात्मिकानीति शान्तानीति अशान्तानीति विविक्तानीति अविविक्तानीति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् वैशारद्यानि नित्यानीति अनित्यानीति सुखानीति दुःखानीति आत्मिकानीति अनात्मिकानीति शान्तानीति अशान्तानीति विविक्तानीति अविविक्तानीति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन् प्रतिसम्विदो नित्या इति अनित्या इति सुखा इति दुःखा इति आत्मिका इति अनात्मिका इति शान्ता इति अशान्ता इति विविक्ता इति अविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापार-

मितायां चरन् महाकरुणानित्या इति अनित्या इति सुखा इति दुःखा इति आत्मिका इति अनात्मिका इति शान्ता इति अशान्ता इति विविक्ता इति अविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नष्टादशावेणिकबुद्धधर्म्माः नित्या इति अनित्या इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नष्टादशावेणिकबुद्धधर्म्माः सुखा इति दुःखा इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नष्टादशावेणिकबुद्धधर्म्माः आत्मिका इति अनात्मिका इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नष्टादशावेणिकबुद्धधर्म्माः शान्ता इति अशान्ता इति चरति निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वोमहासत्त्वोऽनुपाय कौशलेन प्रज्ञापारमितायां चरन्नष्टादशावेणिकबुद्धधर्म्माः विविक्ता इति अविविक्ता इति चरति निमित्ते चरति।

स चेद्भगवन् बोधिसत्त्वस्य महासत्त्वस्याऽनुपाय कौशलेन प्रज्ञापारमितायां चरत एवं भवत्यहं प्रज्ञापारमितायां चरामीत्युपलभे चरत्ययं बोधिसत्त्वोमहासत्त्वो निमित्ते चरति। स चेद्भगवन् बोधिसत्त्वस्य महासत्त्वस्यैवं भवति। य एवं चरति स प्रज्ञापारमितायां चरति। स प्रज्ञापारमितायां भावयतीति निमित्त एवं चरतीदं न बोधिसत्त्वस्य महासत्त्वस्योपाय कौशलं वेदितव्यं।

आयुष्मञ्छारद्वतीपुत्र आयुष्मन्तं सुभूतिमेतदवोचत्। कथमायु-

श्मन् सुभूते बोधिसत्त्वस्य महासत्त्वस्यानुपाय कौशलं वेदितव्यं। सुभूतिराह। तथा ह्यायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्रूपमधितिष्ठति। संजानाति। अधिमुच्यते। स रूपमधितिष्ठन् संजानन्नधिमुच्यमानो रूपस्याऽभिसंस्कारे चरति। स न परिमुच्यते जातिजरामरणशोकव्याधिपरिदेवदुःखदौर्म्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि। स चेद्बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् वेदनामधितिष्ठति संजानात्यधिमुच्यते। स वेदनामधितिष्ठन् संजानन् अधिमुच्यमानो वेदनाया अभिसंस्कारे चरति। न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् संज्ञामधितिष्ठति संजानात्यधिमुच्यते। स संज्ञामधितिष्ठन् संजानन्नधिमुच्यमानः संज्ञाया अभिसंस्कारे चरति। न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् संस्कारानधितिष्ठति संजानात्यधिमुच्यते। स संस्कारानधितिष्ठन् संजानन् अधिमुच्यमानः संस्काराणामभिसंस्कारे चरति। न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहसत्त्वः प्रज्ञापारमितायां चरन् स विज्ञानमधितिष्ठति। संजानात्यधिमुच्यते। स विज्ञानमधितिष्ठन् संजानन्नधिमुच्यमानोविज्ञानस्याभिसंस्कारे चरति। न

परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपाया-सेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरंश्चक्षुरधि-तिष्ठति। संजानात्यधिमुच्यते। स चक्षुरधितिष्ठन् संजानन्नधि-मुच्यमानश्चक्षुषोऽभिसंस्कारे चरति। न परिमुच्यते जातिजरा-व्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञा-पारमितायां चरन् श्रोत्रमधितिष्ठति। संजानात्यधिमुच्यते। स श्रोत्रमधितिष्ठन् संजानन्नधिमुच्यमानः श्रोत्रस्याभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्म-नस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् घ्राणमधितिष्ठति। घ्राणमधितिष्ठन् संजानन्नधिमुच्यमानो घ्राणस्याभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्म-नस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् जिह्वामधितिष्ठति। संजानात्यधिमुच्यते। स जिह्वामधितिष्ठन् संजानन्नधिमुच्यमानो जिह्वाया अभिसंस्कारे चरति। स न परिमुच्यते जातिजरा-व्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापार-मितायां चरन् कायमधितिष्ठति। संजानात्यधिमुच्यते। स काय-मधितिष्ठन् संजानन्नधिमुच्यमानः कायस्याभिसंस्कारे चरति।

स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् मनोऽधितिष्ठति। संजानात्यधिमुच्यते। स मनोऽधितिष्ठन् संजानन्नधिमुच्यमानो-मनोऽभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधि-मरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् रूपमधिति-ष्ठति। संजानात्यधिमुच्यते। स रूपमधितिष्ठन् संजानन्नधिमुच्यमानो-रूपस्याऽभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरण-शोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखा-दिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् शब्दमधितिष्ठति। संजानाति अधिमुच्यते। स शब्दमधितिष्ठन् संजानन्नधिमुच्यमानः शब्दस्याभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परि-मुच्यते महतोदुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् गन्धमधितिष्ठति। संजानात्यधिमुच्यते। स गन्धमधितिष्ठन् संजानन्नधिमुच्यमानो गन्धस्याभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मन-स्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् रसमधितिष्ठति। संजानात्यधिमुच्यते। स रसमधितिष्ठन् संजानन्नधिमुच्यमानो

रमस्याभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्म्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् स्पर्शमधितिष्ठति। संजानात्यधिमुच्यते। स स्पर्शमधितिष्ठन् संजानन्नधिमुच्यमानः स्पर्शस्याऽभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्म्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् धर्म्मानधितिष्ठति। संजानात्यधिमुच्यते। स धर्म्मानधितिष्ठन् संजानन्नधिमुच्यमानो-धर्म्मानामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्म्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरंश्चक्षुर्व्विज्ञानमधितिष्ठति। संजानात्यधिमुच्यते। स चक्षुर्व्विज्ञानमधितिष्ठन् संजानन्नधिमुच्यमानश्चक्षुर्व्विज्ञानस्याभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्म्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

*श्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं कायविज्ञानं मनो-

---

* इतः परं प्रत्येक श्रोत्रविज्ञानादिपदार्थमुद्दिश्य स चेद्बोधिसत्त्व इत्यादि वाक्यभाग आदर्शपुस्तके न लिखितो दृश्यते पूर्व्वलिखित-क्रमादेतेष्वपि तल्लेख उचितः। मया तु आदर्शानुरूपमेव लिखितमिति।

विज्ञानमधितिष्ठति। संजानात्यधिमुच्यते। स एतानधितिष्ठन् संजानन्नधिमुच्यमानः एतेषामभिसंस्कारे चरति। स न परिमुच्यते जाति जराव्याधिमरणशोकपरिदेव दुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् चक्षुःसंस्पर्शजां वेदनामधितिष्ठति। संजानात्यधिमुच्यते। स चक्षुःसंस्पर्शजां वेदनामधितिष्ठन् संजानन्नधिमुच्यमानश्चक्षुःसंस्पर्शजायाः वेदनाया अभिसंस्कारे चरति। स नपरिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि। स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् श्रोत्रसंस्पर्शजां वेदनां घ्राणसंस्पर्शजां वेदनां जिह्वासंस्पर्शजां वेदनां कायसंस्पर्शजां वेदनां मनःसंस्पर्शजां वेदना मधितिष्ठति। संजानात्यधिमुच्यते। स एतान्नधितिष्ठन् संजानन्नधिमुच्यमान एतासामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् अविद्याया अभिसंस्कारे चरति। सोऽविद्यामधितिष्ठन् संजानन्नधिमुच्यमानोऽविद्याया अभिसंस्कारे चरति। न स परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् संस्कारं

नामरूपं षड़ायतनं स्पर्शं वेदनां तृष्णां उपदानं भवं जातिं जरा-मरणमधितिष्ठति। संजानात्यधिमुच्यते । स एतान्यधितिष्ठन् संजा-नन्नाधिमुच्यमान एतेषामभिसंस्कारे चरति । स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परि-मुच्यते महतोदुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् दानपार-मितां शीलपारमितां क्षान्तिपारमितां वीर्य्यपारमितां ध्यानपार-मितां प्रज्ञापारमितामधितिष्ठति । संजानात्यधिमुच्यते। स ताऽ-धितिष्ठन् संजानन्नधिमुच्यमानस्तासामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपाया-सेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नध्यात्मशून्य-तामधितिष्ठति । संजानात्यधिमुच्यते सोऽधितिष्ठन् संजानन्नधि-मुच्यमानोऽध्यात्मशून्यताया अभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो,न परि-मुच्यते महतोदुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् वहिर्द्धाशून्यता-मध्यात्मवहिर्द्धाशून्यतां शून्यताशून्यतां महाशून्यनां परमार्थशून्यतां संस्कृतशून्यतामसंस्कृतशून्यतां अत्यन्तशून्यतां अनवराग्रशून्यतां अनवकारशून्यतां प्रकृतिशून्यतां सर्व्वधर्म्मशून्यतां स्वलक्षणशून्यतां अनुपलम्भशून्यतां अभावशून्यतां स्वभावशून्यतां अभावस्वभावशून्य-तामधितिष्ठति । संजानात्यधिमुच्यते । सोऽधितिष्ठन् संजानन्नधि-

मुच्यमानोऽभिसंस्कारे चरति । न सपरिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् चत्वारि स्मृत्युपस्थानान्यधितिष्ठति। संजानात्यधिमुच्यते। स चत्वारि स्मृत्युपस्थानान्यधितिष्ठन् संजानन्नधिमुच्यमानः चतुर्णां स्मृत्युपस्थानानामभिसंस्कारे चरति । स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् चत्वारि सम्यक् प्रहाणान्यधितिष्ठति । संजानात्यधिमुच्यते । सोऽधितिष्ठन् संजानन्नधिमुच्यमानः चतुर्णां सम्यक्प्रहाणानामभिसंस्कारे चरति । स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् ऋद्धिपादानधितिष्ठति । संजानात्यधिमुच्यते । स ऋद्धिपादानधितिष्ठन् संजानन्नधिमुच्यमानः ऋद्धिपादानामभिसंस्कारे चरति । स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् पञ्चेन्द्रियाण्यधितिष्ठति । संजानात्यधिमुच्यते । स पञ्चेन्द्रियाण्यधितिष्ठन् संजानात्यधिमुच्यमानः इन्द्रियाणामभिसंस्कारे चरति । स न

परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपाया-सेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् पञ्चबला-न्यधितिष्ठति। संजानात्यधिमुच्यते। स पञ्चबलान्यधितिष्ठन् संजा-नन्नधिमुच्यमानः पञ्चबलानामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परि-मुच्यते महतोदुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् सप्तबोध्य-ङ्गान्यधितिष्ठति। संजानात्यधिमुच्यते। स बोध्यङ्गान्यधितिष्ठन् संजा-नन्नधिमुच्यमानः बोध्यङ्गानामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परि-मुच्यते महतोदुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नार्य्याष्टाङ्ग-मार्गमधितिष्ठति। संजानात्यधिमुच्यते। स आर्य्याष्टाङ्गमार्गमधि-तिष्ठन् संजानन्नधिमुच्यमानः आर्य्याष्टाङ्गमार्गस्याभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःख-दौर्मनस्योपायासेभ्यो, न परिमुच्यते महतोदुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नार्य्यसत्या-न्यधितिष्ठति। संजानात्यधिमुच्यते। स आर्य्यसत्यान्यधितिष्ठन् संजानन्नधिमुच्यमानः आर्य्यसत्यानामभिसंस्कारे चरति। न स परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्यो-पायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरंश्चत्वारि ध्यानान्यधितिष्ठति। संजानात्यधिमुच्यते । स ध्यानान्यधितिष्ठन् संजानन्नधिमुच्यमानो ध्यानानामभिसंस्कारे चरति । स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरंश्चत्वार्य्यप्रमाणान्यधितिष्ठति । संजानात्यधिमुच्यते । स चत्वार्य्यप्रमाणान्यधितिष्ठन् संजानन्नधिमुच्यमानोऽप्रमाणानामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरंश्चतस्र आरूप्यसमापत्तीरधितिष्ठति । संजानात्यधिमुच्यते । स आरूप्यसमापत्तीरधितिष्ठन् संजानन्नधिमुच्यमानः आरूप्यसमापत्तीनामभिसंस्कारे चरति । स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नष्टौ विमोक्षानधितिष्ठति । संजानात्यधिमुच्यते । स विमोक्षधर्म्मेष्वधितिष्ठन् संजानन्नधिमुच्यमानो विमोक्षधर्म्माणामभिसंस्कारे चरति । स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि ।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यधितिष्ठति । संजानात्यधिमुच्यते ।

षतान्यधितिष्ठन् संजानन्नधिमुच्यमानस्तेषामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् षड़भिज्ञा अधितिष्ठति। संजानात्यधिमुच्यते। सोऽभिज्ञा अधितिष्ठन् संजानन्नधिमुच्यमानोऽभिज्ञानामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् पञ्चचक्षुरधितिष्ठति। संजानात्यधिमुच्यते। स पञ्चचक्षुरधितिष्ठन् संजानन्नधिमुच्यमानः पञ्चचक्षुषामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् धारणीमुखान्यधितिष्ठति। संजानात्यधिमुच्यते। स धारणीमुखान्यधितिष्ठन् संजानन्नधिमुच्यमानो धारणीमुखानामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् दशतथागतबलान्यधितिष्ठति। संजानात्यधिमुच्यते। स दशतथागतबलान्यधितिष्ठन् संजानन्नधिमुच्यमानो दशतथागतबलानामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःख-

दौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरंश्चत्वारिवैशारद्यान्यधितिष्ठति। संजानात्यधिमुच्यते। स वैशारद्यान्यधितिष्ठन् संजानन्नधिमुच्यमानोवैशारद्यानामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरंश्चतस्रः प्रतिसम्विदोऽधितिष्ठति। संजानात्यधिमुच्यते। स प्रतिसम्विदोऽधितिष्ठन् संजानन्नधिमुच्यमानः प्रतिसम्विदामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेव दुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेद्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नष्टादशावेणिकान् बुद्धधर्म्मानधितिष्ठति। संजानात्यधिमुच्यते। सोऽधितिष्ठन् संजानन्नधिमुच्यमानोऽष्टादशावेणिकबुद्धधर्म्मानामभिसंस्कारे चरति। स न परिमुच्यते जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो, न परिमुच्यते महतो दुःखादिति वदामि।

स चेत् खलु पुनरायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वोऽभव्यः श्रावकभूमिं वा प्रत्येकबुद्धभूमिं साक्षात् कर्त्तुं कः पुनर्व्वादोऽनुत्तरां सम्यक् सम्बोधिमभिसम्भोत्स्यते इति नेदं स्थानं विद्यते। एवं खल्वायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुपायकुशलो वेदितव्यः। शारद्वतीपुत्र आह। कथमायुष्मन् सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकुशलो वेदितव्यः।

सुभूतिराह । यदायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्ननुरूपे चरति । न रूपस्य निमित्ते चरति । न रूपं नित्यमिति चरति । न रूपमनित्यमिति चरति । न रूपं सुखमिति चरति । न रूपं दुःखमिति चरति । न रूपमात्मेति चरति । न रूपमनात्मेति चरति । न रूपं शान्तमिति चरति । न रूपमशान्तमिति चरति । न रूपं शून्यमिति चरति । न रूपमशून्यमिति चरति । न रूपं निमित्तमिति चरति । न रूपमनिमित्तमिति चरति । न रूपं प्रणिहितमिति चरति । न रूपमप्रणिहितमिति चरति । न रूपं विविक्तमिति चरति । न रूपमविविक्तमिति चरति ।

स वेदनायां चरति । न वेदनायानिमित्ते चरति । न वेदना नित्येति चरति । न वेदना ऽनित्येति चरति । न वेदना सुखेति चरति । न वेदना दुःखेति चरति । न वेदना श्रात्मेति चरति । न वेदना ऽनात्मेति चरति । न वेदना शान्तेति चरति । न वेदना श्रशान्तेति चरति । न वेदना शून्येति चरति । न वेदना ऽशून्येति चरति । न वेदना निमित्तेति चरति । न वेदना ऽनिमित्तेति चरति । न वेदना प्रणिहितेति चरति । न वेदना ऽप्रणिहितेति चरति । न वेदना विविक्तेति चरति । न वेदना ऽविविक्तेति चरति ।

न संज्ञायां चरति । न संज्ञाया निमित्ते चरति । न संज्ञा नित्येति चरति । न संज्ञा ऽनित्येति चरति । न संज्ञा सुखेति चरति । न संज्ञा दुःखेति चरति । न संज्ञा श्रात्मेति चरति ।

न संज्ञा ऽनात्मेति चरति। न संज्ञा शान्तेति चरति। न संज्ञा ऽशान्तेति चरति। न संज्ञा शून्येति चरति। न संज्ञा ऽशून्येति चरति। न संज्ञा निमित्तेति चरति। न संज्ञा अनिमित्तेति चरति। न संज्ञा प्रणिहितेति चरति। न संज्ञा ऽप्रणिहितेति चरति। न संज्ञा विविक्तेति चरति। न संज्ञा ऽविविक्तेति चरति।

न संस्कारेषु चरति। न संस्काराणां निमित्ते चरति। न संस्कारा नित्या इति चरति। न संस्कारा अनित्या इति चरति। न संस्कारा सुखा इति चरति। न संस्कारा दुःखा इति चरति। न संस्कारा आत्मान इति चरति। न संस्कारा अनात्मान इति चरति। न संस्कारा शान्ता इति चरति। न संस्कारा अशान्ता इति चरति। न संस्कारा शून्या इति चरति। न संस्कारा अशून्या इति चरति। न संस्कारा निमित्ता इति चरति। न संस्कारा अनिमित्ता इति चरति। न संस्कारा प्रणिहिता इति चरति। न संस्कारा अप्रणिहिता इति चरति। न संस्कारा विविक्ता इति चरति। न संस्कारा अविविक्ता इति चरति।

न विज्ञाने चरति। न विज्ञानस्य निमित्ते चरति। न विज्ञानं नित्यमिति चरति। न विज्ञानमनित्यमिति चरति। न विज्ञानं सुखमिति चरति। न विज्ञानं दुःखमिति चरति। न विज्ञानमात्मेति चरति। न विज्ञानमनात्मेति चरति। न विज्ञानं शान्तमिति चरति। न विज्ञानमशान्तमिति चरति। न विज्ञानं शून्यमिति चरति। न विज्ञानमशून्यमिति चरति। न विज्ञानं निमित्तमिति चरति। न विज्ञानमनिमित्तमिति

चरति। न विज्ञानं प्रणिहितमिति चरति। न विज्ञानमप्रणिहितमिति चरति। न विज्ञानं विविक्तमिति चरति। न विज्ञानमविविक्तमिति चरति।

न चक्षुषि चरति। न चक्षुषो निमित्ते चरति। न चक्षुर्नित्यमिति चरति। न चक्षुरनित्यमिति चरति। न चक्षुः सुखमिति चरति। न चक्षुर्दुःखमिति चरति। न चक्षुरात्मेति चरति। न चक्षुरनात्मेति चरति। न चक्षुः शान्तमिति चरति। न चक्षुरशान्तमिति चरति। न चक्षुः शून्यमिति चरति। न चक्षुरशून्यमिति चरति। न चक्षुर्निमित्तमिति चरति। न चक्षुरनिमित्तमिति चरति। न चक्षुः प्रणिहितमिति चरति। न चक्षुरप्रणिहितमिति चरति। न चक्षुर्विविक्तमिति चरति। न चक्षुरविविक्तमिति चरति।

न श्रोत्रे चरति। न श्रोत्रस्य निमित्ते चरति। न श्रोत्रं नित्यमिति चरति। न श्रोत्रमनित्यमिति चरति। न श्रोत्रं सुखमिति चरति। न श्रोत्रं दुःखमिति चरति। न श्रोत्रमात्मेति चरति। न श्रोत्रमनात्मेति चरति। न श्रोत्रं शान्तमिति चरति। न श्रोत्रमशान्तमिति चरति। न श्रोत्रं शून्यमिति चरति। न श्रोत्रमशून्यमिति चरति। न श्रोत्रं निमित्तमिति चरति। न श्रोत्रमनिमित्तमिति चरति। न श्रोत्रं प्रणिहितमिति चरति। न श्रोत्रमप्रणिहितमिति चरति। न श्रोत्रं विविक्तमिति चरति। न श्रोत्रमविविक्तमिति चरति।

न घ्राणे चरति। न घ्राणस्य निमित्ते चरति। न घ्राणं

नित्यमिति चरति। न घ्राणमनित्यमिति चरति। न घ्राणं सुख-मिति चरति। न घ्राणं दुःखमिति चरति। न घ्राणमात्मेति चरति। न घ्राणमनात्मेति चरति। न घ्राणं शान्तमिति चरति। न घ्राणमशान्तमिति चरति। न घ्राणं शून्यमिति चरति। न घ्राणमशून्यमिति चरति। न घ्राणं निमित्तमिति चरति। न घ्राणमनिमित्तमिति चरति। न घ्राणं प्रणिहितमिति चरति। न घ्राणमप्रणिहितमिति चरति। न घ्राणं विविक्तमिति चरति। न घ्राणमविविक्तमिति चरति।

न जिह्वायां चरति। न जिह्वायानिमित्ते चरति। न जिह्वा नित्येति चरति। न जिह्वाऽनित्येति चरति। न जिह्वा सुखेति चरति। न जिह्वा दुःखेति चरति। न जिह्वा आत्मेति चरति। न जिह्वा अनात्मेति चरति। न जिह्वा शान्तेति चरति। न जिह्वाऽशान्तेति चरति। न जिह्वा शून्यमिति चरति। न जिह्वा ऽशून्यमिति चरति। न जिह्वा निमित्ते चरति। न जिह्वाऽनिमित्ते चरति। न जिह्वा प्रणिहितेति चरति। न जिह्वा ऽप्रणिहितेति चरति। न जिह्वा विविक्तेति चरति। न जिह्वाऽविविक्तेति चरति।

न काये चरति। न कायस्यनिमित्ते चरति। न कायं नित्य-मिति चरति। न कायमनित्यमिति चरति। न कायं सुखमिति चरति। न कायं दुःखमिति चरति। न कायमात्मेति चरति। न कायमनात्मेति चरति। न कायं शान्तमिति चरति। न काय-मशान्तमिति चरति। न कायं शून्यमिति चरति। न काय-

	Rs.	
Padumawati, Fasc. 1-4 @ 2/	8	0
Pariçiṣṭa Parvan, (Text) Fasc. 1-5 @ /6/ each	1	14
Prākṛita-Paingalam, Fasc. 1-7 @ /6/ each	2	10
Prithivirāj Rāsa (Text) Part II, Fasc. 1-5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākṛta Lakṣaṇam (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /6 each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8, @ /6/ each Fasc.	12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each	1	8
Ditto (English) Fasc. 1-3 @ /12/ each	2	4
Sraddha Kriya Kaumudi, Fasc. 1-5	1	14
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each	12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each	7	2
Trantra Vartika (English) Fasc. 1-2 @ /12/	1	8
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /6/ each	14	4
Tattvarthadhigama Sutrom, Fasc. 1-2	0	12
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/	1	2
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-6 @ /6/ each ...	2	4
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/	4	8
Vallala Carita, Fasc. 1	0	6
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each	5	4
Varsa Krya Kaumudi, Fasc. 1-6 @ /6/	2	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each	4	8
Vidhano Parigata, Fasc. 1-5	1	14
Viṣṇu Smṛti, (Text) Fasc. 1-2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each	2	10
Vṛhannāradiya Purāṇa, (Text) Fasc. 2-6 @ /6/	1	14
Vṛhat Svayambhū Purāṇa, Fasc. 1-6	2	4

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1-4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-5 @ 1/ each	13	0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each	10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ /12/	2	4
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each	37	0
Ditto English Vol. I, Fasc. 1-8; Vol. II, Fasc. 1 @ 1/ each ...	9	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts 1-2	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /6/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1-5 @ /6/ each	1	14

The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1-15 @ /6 ea ... Rs. 5
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1- Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each 12
Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /6/ each 7
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1-6 @ /6/ each 2
Nukhbatu-l-Fikr, (Text) Fasc. 1 0
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /1/ each 1
Riyāẓu-s-Salātīn, (Text) Fasc. 1-5 @ /6/ each 1
Ditto Ditto (English) Fasc. 1-5 3
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1-5 @ /6/ each 1
Ditto (English) Fasc. 1-14 @ /12/ each 10
Ditto Index 1
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1-7 @ /6/ each... 2
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1-6 @ /6/ each... 2
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each 3
Wīs o Rāmīn, (Text) Fasc. 1-5 @ /6/ each 1
Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /6/ each . 6
Tuzuk-i-Jahāngirī (Eng.) Fasc. 1 0

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XIX and XX @ 10/ each 20
2. Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.
3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), 1903 (8), @ 1/8 per No. to Members and @ 2/per No. to Non-Members.

N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784–1883 ... 3
A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) 4
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) 2
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) 4
5. Anīs-ul-Musharrahīn 3
6. Catalogue of Fossil Vertebrata 3
7. Catalogue of the Library of the Asiatic Society, Bengal 3
8. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each... 32
9. Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ... 2
10. Khizānatu-l-'ilm 4
11. Mahābhārata, Vols. III and IV, @ 20/ each 40
12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each 18
13. Sharaya-ool-Islām 4
14. Tibetan Dictionary, by Csoma de Körös 10
15. Ditto Grammar " " 8
16. Kaçmīraçabdāmṛta, Parts I and II @ 1/8/ 3
17. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson... 1
18. Memoir on maps illustrating the Ancient Geography of Kaśmir, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899 4

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each 29
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

14-9-04.

Books are supplied by V.-P.P.